शुक्रोय चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मामूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति। तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥

"यथास्वं वेदनावर्णं दुष्टं सान्द्रमथाविलं।
पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः" ॥

अथ जातासु नाभि-वस्ति-सेवनी-मेढ्रेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं ससिकतं विसृजति धावन-लङ्घन-प्लवन-पृष्ठ-यानाध्वगमनैश्चास्य वेदना भवति ॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥

पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यते इव वस्तिरुष्णवातश्च भवति। अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥

वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति वायुं स्पृशति विशर्द्धते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण चास्य मेहतो निःसरन्ति। अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता भवति तां वातिकीमिति विद्यात् ॥

प्रायेणैतास्त्रिविधोऽश्मर्य्यो दिवास्वप्न-समशनाध्यशन-शीत-स्निग्ध-गुरु-मधुराहारप्रियत्वादिशेषेण बालानां भवन्ति तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति ॥ महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रञ्च तिलमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संगृह्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोः श्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥

अस्याश्चिकित्सा यथा ॥

"अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः।
औषधैस्तरुणः साध्यः प्रवृद्धश्छेदमर्हति ॥
तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥
घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरवस्तिभिः।
यदि नोपशमं गच्छेत् छेदस्तत्रोत्तरो विधिः ॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरिहाध्रुवा।
उपक्रमो जघन्योऽयमतः स परिकीर्त्तितः ॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्।
तस्मादापृच्छ्य कर्त्तव्यमीश्वरं साधुकारिणा" ॥

अथ रोगान्वितमुपस्निग्धमपकृष्टदोषमीषत् कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतवलिमङ्गलस्वस्तिवाचनमयोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य ततो बलवन्तमविक्लवमाजानुसमे फलके प्रागुपवेश्य पुरुषस्य तस्योत्सङ्गे निषण्णपूर्व्वकायमुत्तानमुन्नतकटीकं वस्त्राधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण शाटकैर्वा ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीड़येदधोनाभेर्यावदश्मर्य्यधः प्रपन्नेति। ततः स्नेहाभ्यक्ते कृत्तनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्वलीकमनायतमविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पीड़येदङ्गुलिभ्यां यथाग्रन्थिरिवोन्नतं शल्यं भवति ॥

"सचेदगृहीतशल्ये तु विहताक्षो विचेतनः।
हतवक्त्रश्च शीर्षश्च निर्व्विकारो मृतोपमः ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः।
विना तेषु रूपेषु निर्हर्त्तुं समुपाचरेत् ॥"

इति सुश्रुतः ॥

"अयोरजः श्लक्ष्णपिष्टं मधुना सह योजयेत्।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणं ॥"

॥ * ॥ लौहप्रयोगः ॥ * ॥

इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अश्मरीघ्नः, पुं, (अश्मरीं मूत्रकृच्छ्रं हन्ति। अश्मरी + हन् + टक्।) वरुणवृक्षः। इति त्रिकाण्डशेषः ॥

अश्मरीहरः, पुं, (अश्मरीं हरति। अश्मरी + हृ + अच्।) धान्यविशेषः। इति रत्नमाला ॥ दे धान इति ख्यातः।

"वरुणः कफवातघ्नो भेदी चोष्णोऽश्मरीहरः"।
इति वैद्यकद्रव्यगुणः ॥)

अश्मसारः, पुं, क्ली, (अश्मनः सारः।) लौहः। इत्यमरः ॥ ("प्रायाः सत्वरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी"। इति साहित्यदर्पणे।)

अश्मीरः, पुं, क्ली, (अश्मन् + ईर।) अश्मरीरोगः ॥ इत्युणादिकोषः ॥

अश्मोत्थं, क्ली, (अश्मनः उत्तिष्ठति यत्। उत् + स्था + क।) शिलाजतु। इति राजनिर्घण्टः ॥

अश्रं, क्ली, (अश्नुते व्याप्नोति नेत्रं कण्ठं वा अश् + रक्।) नेत्रजलं। इत्युणादिकोषः ॥

("तामश्रुपूर्णं नवजलमयं मोचयिष्यत्यवश्यं"।
इति मेघदूते ॥

"सखीभिरश्रोत्तरमीक्षितामिमाम्"। इति कुमारे ॥) रक्तं। इत्यमरटीका ॥

अश्रद्धधानः, त्रि, (न श्रद्धधानः। नञ्तत्पुरुषः।) श्रद्धाहीनः। यथा देवलः।

"प्रत्ययो धर्म्मकार्य्येषु तथा श्रद्धेत्युदाहृता।
नास्ति ह्यश्रद्दधानस्य धर्म्मकृत्ये प्रयोजनं" ॥
इति श्राद्धतत्त्वं ॥

अश्रद्धा, स्त्री, (न श्रद्धा। नञ्तत्पुरुषः।) शास्त्रार्थे अदृढ़प्रत्ययः। यथा,—

"विधिहीनं भावदुष्टं कृतमश्रद्धया च यत्।
तद्धरन्त्यसुरास्तस्य मूढ़स्य दुष्कृतात्मनः" ॥

इति श्राद्धतत्त्वं ॥ (मानसिकवृत्तिभेदः। यथा श्रुतौ,—

"कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" ॥

"अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" ॥
इति गीतायाम् ॥)

अश्रद्धेयं, त्रि, श्रद्धानर्हं। आदरायोग्यं। शास्त्रार्थादृढ़प्रत्यययोग्यं। अत् शब्दपूर्व्वक धाधातोर्यप्रत्यये पश्चान्नञ्समासेन निष्पन्नं ॥ ("किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेनाग्रहेण"। इति पञ्चतन्त्रे।)

अश्रपः, पुं, क्ली, (अश्रं रक्तं पिबति यः। अश्र + पा + ड।) राक्षसः। इत्यमरः ॥

अश्राद्धभोजी, [न्] त्रि, (न श्राद्धभोजी। नञ्तत्पुरुषः।) श्राद्धान्नाभक्षकः। यथा। दुर्गसिंहोऽपि अश्राद्धभोजीत्यस्य सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धमिति न नियमः। तथात्वे व्रतलोपः स्यात्। इति प्रायश्चित्ततत्त्वं ॥

अश्राद्धी, [न्] पुं, (अश्राद्धमस्त्यस्य। अश्राद्ध + इन्।) श्राद्धपक्षयत्नशून्यः। यथा मनुः।

"नाद्यात् शूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः।
आददीताममेवास्मादवृत्तावेकरात्रिकं" ॥

अश्राद्धिनः श्राद्धपक्षयत्नशून्यस्य। इत्याह्निकाचारतत्त्वं ॥

अश्राद्धेयः, पुं, (न श्राद्धेयः। नञ्समासः।) श्राद्धानर्हः। श्राद्धायोग्यब्राह्मणः। यथा। अत्रिकाश्यपौ,—

"पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्बलः।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिं" ॥
इत्युद्वाहतत्त्वं ॥

अश्रान्तं, क्ली, (अविद्यमानं श्रान्तमत्र। नञ्समासः) अनवरतं। नित्यं। इत्यमरः ॥ श्रमरहिते त्रि ॥

अश्रान्तः, त्रि, श्रमरहितः। यथा। "अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना। पूर्व्वं गाधिसुतेन सामिघटिता मुक्तानु मन्दाकिनी यत् प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि" ॥ इति नैषधे १ सर्गः ॥

अश्रिः, स्त्री, (अश्नाति अश्नुते वा। अश भोजने अश व्याप्तौ वा। आश्रीयते प्रहारार्थम्। आङि-श्रिहनिभ्यां ह्रस्वश्चेति इण् स च डित् डित्वात् टिलोप आङो ह्रस्वश्च।) गृहादेः कोणः। इति हेमचन्द्रः ॥ अस्त्रादेरग्रभागः। इत्यमरः ॥